# shrIgokulanAthAShTakam

# શ્રીગોકુલનાથાષ્ટકમ્

## Document Information

Text title : gokulanAthAShTakam

File name : gokulanAthAShTakam.itx

Category : vishhnu, krishna, puShTimArgIya, aShTaka, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 22, 2023

*sanskritdocuments.org*

shrIgokulanAthAShTakam

# શ્રીગોકુલનાથાષ્ટકમ્

ભવભીતજનાખિલભીતિહરં
હરવન્દિતનન્દતનૂજરતમ્ ।
રતવૃદ્ધગુરુદ્વિજભૃત્યજનં
જનદુર્લભમાર્ગસુબોધકરમ્ ॥ ૧॥

કરપદ્મસુસેવિતશૈલધરં
ધરણીતલવિશ્રુતસાધુગુણમ્ ।
ગુણસિન્ધુવિમર્દિતદુષ્ટમુખં
મુખકલ્પિતમાર્ગનિવૃત્તિપરમ્ ॥ ૨॥

પરમપ્રિયમઙ્ગલવેષધરં
વરબન્ધુસુહૃત્સુતલબ્ધસુખમ્ ।
સુખસાગરમમ્બુજચારુમુખં
મુખપઙ્કજકીર્તિતકૃષ્ણકથમ્ ॥ ૩॥

કથનીયગુણામૃતવારિનિધિં
નિધિસેવિતમર્ચિતપદ્મપદમ્ ।
પદપઙ્કજસંશ્રિતવિજ્ઞબુધં
બુધવિઠ્ઠલનાથચતુર્થસુતમ્ ॥ ૪॥

સુતરાં કરુણાબ્ધિમનન્તગુણં
ગુણરત્નવિરાજિતશુદ્ધતનુમ્ ।
તનુરત્નવશીકૃતનન્દસુતં
સુતમિત્રકલત્રસુસેવ્યપદમ્ ॥ ૫॥

પદપઙ્કજપાવિતસાધુજનં
જનહેતુગૃહીતમનુષ્યતનુમ્ ।
તનુકાન્તિતિરસ્કૃતપઞ્ચશરં
શરણાગતરક્ષિતભક્તજનમ્ ॥ ૬॥

જનતોષણપોષણદત્તહૃદં
હૃદયાર્પિતગોપવધૂરમણમ્ ।
રમણીયતરામલભક્તિકૃતં
કૃતકૃષ્ણકથામૃતતૃપ્તજનમ્ ॥ ૭॥

જનવાઞ્છિતકામદરત્નગુણં
ગુણભૂષણભૂષિતલોકગુરુમ્ ।
ગુરુગોકુલનાથમુપાસ્યમહં
મહતાં પરિસેવિતમાકલયે ॥ ૮॥

શ્રીમદ્ગોકુલનાથાનામષ્ટકં યઃ પઠેન્નરઃ ।
ગોકુલેશપદામ્ભોજભક્તિં સ લભતે પરામ્ ॥ ૯॥

ઇતિ સિંહાવલોકયમકગર્ભ શ્રીગોકુલનાથાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIgokulanAthAShTakam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*